यद्वा मेघाकाशसंयोगे विभागे वा शब्दासमवायिकारणे कारणम् अपामेव नोदनाभिघातजनितं कर्मेति सूचितं कर्मण एवाधिकारप्राप्तत्वात् ११। भूकम्पं प्रत्यदृष्टवदात्मसंयोगः कारणमुक्तं तत्रैवाकस्मिकदिग्दाहहेतोस्तेजसः आकस्मिकवृक्षादिक्षोभहेतोश्च प्रभञ्जनस्य कर्म यत् संजायते तत्राप्यदृष्टवदात्मसंयोगोऽसमवायिकारणम्, वायुतेजसी समवायिकारणम्, अदृष्टं निमित्तकारणमित्यर्थः, कर्मशब्दस्य द्व्यावृत्तिर्महोल्कादिकर्मसूचनार्था १२। अदृष्टवदात्मसंयोगासमवायिकारणकं कर्मान्तरमाह। आद्यमिति सर्गाद्यकालीनमित्यर्थः, तदा नोदनाभिघातादीनामभावात् अदृष्टवदात्मसंयोग एव तत्रासमवायिकारणम् आद्यमूर्द्ध्वज्वलनम् आद्यं तिर्य्यक्पवनमिति, इतरेषां ज्वलनपवनकर्मणां वेगासमवायिकारणकत्वमेव मन्तुमुचितं दृष्टे कारणे सत्यदृष्टकल्पनानवकाशात् १३। अनाद्यं कर्माधिकृत्याह। मुषलोत्क्षेपणादौ यथा प्रयत्नवदात्मसंयोगासमवायिकारणकं हस्तकर्म तथाऽभिमतविषयग्राहिणीन्द्रिये सन्निकर्षार्थं यन्मनसः कर्म तदपि प्रयत्नवदात्मसंयोगासमावयिकारणकमेव। यद्यपीन्द्रियं मनो न साक्षात्प्रयत्नविषयस्तथापि मनोवहनाड़ीगोचरेण प्रयत्नेन मनसि कर्मोत्पत्तिर्द्रष्टव्या, नाड्यास्तु त्वगिन्द्रियग्राह्यत्वमङ्गीकर्त्तव्यम् अन्यथा प्राणवहनाडीगोचरेण प्रयत्नेनाशितपीताद्यभ्यवहरणमपि न सम्भवेत् १४। ननु मनसि कर्म्म उत्पद्यत इत्यत्रैव न प्रमाणमत आह। सुखदुःखे इत्युपलक्षणं ज्ञानप्रयत्नाद्यपि द्रष्टव्यं मनसोवैभवं पूर्व्वमेव निराकृतम्, अणुत्वञ्च साधितम्, युगपज्ज्ञानानुत्पत्तिश्च मनसो लिङ्गमित्युक्तं तेन तत्तदिन्द्रियप्रदेशेन मनःसंयोगमन्तरेण सुखदुःखे न स्यातामेव यदि मनसि कर्म्म न भवेत् न भवेच्च पादे मे सुखं शिरसि मे वेदनेत्याद्याकारोऽनुभव इत्यर्थः। यद्यपि मनःसन्निकर्षाधीनः सर्व्वोऽप्यात्मविशेषगुणस्तथापि सुखदुःखे तीव्रसंवेगितयाऽतिस्फुटत्वादुक्ते १५। नन्वेवं यदि चपलं मनस्तदा चित्तनिरोधाभावाद्योगं विना नात्मसाक्षात्कारो न वा तमन्तरेण मोक्ष इति शास्त्रारम्भवैफल्यमतआह विषयेष्वलम्प्रत्ययवत उदासीनस्य बहिरिन्द्रियेभ्योव्यावृत्तं मनो यदात्मस्यमात्ममात्रनिष्ठं भवति तदा तत्कर्मानुगुणप्रयत्नाभावात् कर्म्म मनसि नोत्पद्यते स्थिरतरं मनो भवति स एव योगः चित्तनिरोधलक्षणत्वाद् योगस्य, तदनारम्भ इति मनसः कर्मानारम्भ इत्यर्थः। यद्वा तत्पदेन सुखदुःखे एवाभिधीयेते प्रक्रान्तत्वात्, दुःखाभाव इति दुःखाभावसाधनत्वाद्योग एव दुःखस्याभावः "अन्नं वै प्राणः" इति वत्, यद्वा दुःखस्याभावो यत्रेति बहुव्रीहिः, शरीरस्येति शरीरावच्छिन्नस्यात्मनः, स योग इति प्रसिद्धिसिद्धतया तत्पदम्, अयं स योगः। यद्वात्मपदेनात्र प्राण उच्यते उपचारात् प्राणानुमेयत्वादात्मनः तथा च प्राणवहनाड्यां कर्मणा प्राणकर्मापि जायते यद्वा जीवनयोनियत्नवदात्मप्राणसंयोगासमवायिकारणकं प्राणकर्म, जीवनयोनिश्च यत्नोऽतीन्द्रियः प्राणसञ्चारानुमेयः कथमन्यथा सुषुप्त्यवस्थायामपि श्वासप्रश्वासगतागतमिति भावः १६। ननु प्राणस्य मनसश्च कर्म यदि प्रयत्ननिमित्तकं तदा प्राणमनसी यदा मरणावस्थायामपसर्पतः देहाद्बहिर्भवतः देहान्तरोत्पत्तौ तत्र पुनरुपसर्पतः प्रविशतः तत्र प्रयत्नाभावात्तदुभयमनुपपन्नम्, अशितपीतं भक्तपानीयादि तस्यापि शरीरावयवोपचयहेतुर्यः संयोगस्तज्जनकं यत् कर्म यच्च गर्भवासदशायां संयोगविभागजनकं कर्म तेषां कथमुत्पत्तिरत आह। अत्र "नपुंसकमपुंसकेनैकवच्चान्यतरस्यामिति" पा॰ नपुंसकनिर्द्देशः, संयोगपदञ्च तत्कारणे कर्मणि लाक्षणिकम्, अपसर्पणं देहारम्भककर्मक्षये देहादेव प्राणमनसोरुत्क्रमणम्, उपसर्पणञ्च देहान्तरोत्पत्तौ तत्र प्राणमनसोः प्रवेशनम्, अशितपीतादिसंयोगहेतुश्च कर्म, कार्य्यान्तरं गर्भशरीरं तत्संयोगहेतुश्च यत् कर्म तत् सर्व्वमदृष्टवदात्मसंयोगासमवायिकारणकम्, इतिकारेण धातुमलकर्मणामप्यदृष्टवदात्मसंयोगासमवायिकारणकत्वं सूचयति" १७ उप॰।

**असमवायिन्** त्रि॰ न समवैति सम्+अव+इन-इणि न॰त॰ स्त्रियां ङीप्। १असंबन्धे अमिलिते न्यायोक्ते २समवायसम्बन्धशून्ये जात्यादौ ३असमवायिकारणे च "कारणन्त्वसमवायिनो गुणाः" वै॰सू॰ "ननु यद्यमूर्त्तत्वात् गुणाः कर्मसमवायिकारणं न भवन्ति तदा गुणैर्गुणाः कर्म्माणि च कथमुत्पद्यन्ते न हि समवायिकारणातिरिक्तत्वरूपेणापि कारणता संभवतीत्यत आह गुणा असमवायिकारणं न तु समवायिकारणमपि येन कर्माधाराः स्युः। सा चासमवायिकारणता क्वचित् कार्य्यैकार्थसमवायात् यथाऽऽत्ममनःसंयोगस्यात्मविशेषगुणेषु संयोगविभागशब्दानां शब्दे, क्वचित् कारणैकार्थसमवायात् यथा कपालादिरूपादीनां घटादिरूपादिषु" उपस्कारः।

**असमवृत्त** न॰ न समानि भिन्नलक्षणकत्वात् न तुल्यानि पदानि यत्र कर्म॰। छन्दःशास्त्रोक्ते १विषमवृत्ते तानि च "मुखपादोऽष्टभिर्वर्णैः परेऽऽख्यान्मकरालयैः क्रमाद्वृद्धाः"